**अरण्यराशि** अरण्यसंज्ञको राशिः। "मकरादिमार्द्धसिंहौ वन्यौ दिवसेऽजवृषभौ चेति" ज्योतिषोक्ते सिंहादिराशौ।

**अरण्य(ण्ये)रुदित** न० अरण्ये रुदितं रोदनम् सप्तम्या वा अलुक्। शान्त्युपायकारकश्रोतृशून्ये निष्फले १ रोदने २ तत्तुल्ये निष्फले वस्तुमात्रे च। लोके हि रोदने तद्रोदनशान्त्युपायोदयालुभिः क्रियते अरण्ये रोदने तु न कश्चित् तस्य शमयितेति तस्य निष्फलत्वम्।

**अरण्यवायस** पु० ६त०। (दाँड़काक) इतिख्याते द्रोणकाके।

**अरण्यवास** पु० अरण्ये वासः। वनवासे।

**अरण्यवासिन्** त्रि० अरण्ये वसति वस–णिनि। वनवासिनि १मुन्यादौ "एते हिमगिरेरुपत्यकारण्यवासिन" इति शकु०। स्त्रियां ङीप्। सा च २ अत्यम्लपर्णीलतायां राजनि०। [वास्तूके।

**अरण्यवास्तूक** पु० ६त०। (वनवेतो) इति ख्याते बन-

**अरण्यशालि** पु० अरण्यभवः शालिः। वनभवे नीवारादौ।

**अरण्यशूकर** पु० अरण्यस्य शूकरः। वनवराहे। [शूरणे।

**अरण्यशूरण** पु० शा०त०। वनभवे (ओल) इति ख्याते

**अरण्यश्वन्** पु० अरण्ये श्वेव हिंस्रः। वृके।

**अरण्यषष्ठी** स्त्री अरण्याय गन्तुं षष्ठी। ज्यैष्ठशुक्लषष्ठ्याम्। "ज्यैष्ठे मासि सिते पक्षे षष्ठी यारण्यसंज्ञिता। व्यजनैक-करास्तस्यामटन्ति विपिने स्त्रियः" इतिः राजमा०।

**अरण्याध्यक्ष** पु० अरण्यरक्षणादौ अध्यक्षः। वनेषु लोकरक्ष-णार्थं राजनियुक्ते सैन्यपतिभेदे।

**अरण्यानी** स्त्री महदरण्यं नि०ङीप् आनुक् च। महा-रण्ये। "यथारण्यान्यासुत्साश्वरत" शत०ब्रा०।

**अरण्यायन** न० अरण्येऽयनं वानप्रस्थधर्म्मस्तदिवाचरणम-स्त्यस्य अच्। "यद् अरण्यायनमित्याचक्षते ब्रह्मचर्य्य मेव तदिति" श्रुत्युक्ते ब्रह्मचर्य्ये। "तदरश्च ण्यश्चार्णवावित्या-दिना तत्रैव व्युत्पत्तिर्दर्शिता।

**अरण्येतिलक** पु० सप्तम्या अलुक्। वनतिलभेदे।

**अरण्येऽनूच्य** त्रि० अरण्ये अनूच्यः नियतपाठ्यो मन्त्रो यस्य अलुक् समा० १ अरण्यमात्रपाठ्यमन्त्रेण संस्कृते पुरो-डाशादौ "पश्चादरण्येऽनूच्याम्" १८,४,२०। "अरण्येऽ-नूच्या वक्तव्याः पठनीया मन्त्रा यस्यासौ अरण्येऽनूच्य" इति कर्क०। ७त०अलुक्स०। २अरण्येऽनूच्ये (पाठ्ये) मन्त्रभेदे पु०। स च "उग्रस्य भीमस्येत्यादिमन्त्रः सहि नियतमरण्ये पठ्यते" इति कर्क०। "वागेवारण्येऽनूच्या-सोऽरण्येनूच्यो भवति" ता०ब्रा०। "अरण्येऽनूच्यः कश्चि-दनुवाकः तेन हूयमानोऽपि पुरोडाशोऽरण्येऽनूच्यो भवति" भा०। अयमेव पक्षः श्रेयान् कर्कमते बहुव्रीह्या श्रयणे सप्तम्या लुक् न स्यात् अलुक्समासस्य तत्पुरुषै कविषयत्वात् अत उपचारात् तत्सम्बन्धवाचकत्वं युक्तम् "सोऽस्यैषोऽवाङ् प्राण एतस्य प्रजापतेः सोऽरण्येनूच्यो भवति" शत०ब्रा०।

**अरण्यौकस्** पु०अरण्ये विधानेनओकोयस्य। १मुन्यादौ २वान-प्रस्थे "वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः" शकु०

**अरत** त्रि० न रतः। १ अननुरक्ते २विरते च। [त्रि०।

**अरतत्रप** पु० अरता विरता त्रपा यस्य। १ कुक्कुरे २लज्जाहीने

**अरति** पु० ऋ–अति। १क्रोधे। रम–क्तिन् न०त०। २अनवस्थितचित्ततायाम्, ३रागाभावे, "मुखं कषाय-मरतिर्गौरवं कण्ठवक्षसोः" सुश्रुतः। ४ रतिविरहे, ५उद्वेगे, "स्वाभीष्टवस्त्वलाभेन चेतसो याऽनवस्थितिः अरतिःसा" इत्येवंरूपे ६ इष्टवियोगान्मनसोव्याकुलीभावे ७ असन्तोषे "भृशमरतिं हि सद्वियोगः" इति। किरा० स्मरकृते ८ नायकदशाभेदे च स्त्री। "दृङ्मनः सङ्गसङ्कल्पाजागरः कृशताऽरतिः। ह्रीत्यागोन्मादमूर्च्छा-न्ताः इत्यनङ्गदशा दश" मल्लि०। सा च विषयविद्वेषं करोति। न०ब०। ६रागहीने त्रि०।

**अरत्नि** पु० ऋ–कत्नि रत्निः बद्धमुष्टिकरः स नास्ति यत्र। १विस्तृतकनिष्ठे बद्धमुष्टिहस्ते, २कफोणिमारभ्य कनिष्ठाङ्गुलि-पर्य्यन्तपरिमाणे। अतस्ततः प्रमाणे मात्रच्। तत्परिमिते त्रि०। "अरत्निमात्रान्तरिते देशे" भवदेवः। "तामुत्तर-तोऽग्नेर्निदधात्यरत्निमात्रे" गृह्यसू०। "अरत्निमात्र क्षुपकाः पत्रैर्द्व्यङ्गुलसम्मितैः" सुश्रु०। ३ कफोणौ (कुनो) बाह्वोरवयवे। "भीष्मो धनुष्मानुपजान्वरत्निः" भट्टिः। "जवनेनाहवनीयमरत्नौ संधत्त" शत०ब्रा०। ४ बाहौ बाहुर्वा अरत्निः बाहुना वीर्यं क्रियते" शत० ब्रा०। वा कप्। अरत्निकोऽप्युक्तार्थे।

**अरथि** पु० ऋच्छति रथिना सह युद्धभूमिम् ऋ–रथिन् सारथिः न०त०। सारथिभिन्ने। "अस्त्वनश्वश्चिद्य-मजत्यरथीः" ऋ० ६,६६,७, रथिः सारथिः न रथि-अरथिः" छा०दीर्घः भा०। [२ भग्नदन्ते वृद्धे च

**अरद** पु० न जातोरदोयस्य। अजातदन्तावस्थे बाले

**अरध्र** त्रि० राध–हिंसने, कर्म्मणि रन् ह्रस्वश्च न०त०। शत्रु-"भिरहिंस्ये उग्रमुग्रस्य तवसस्तवीयोऽरध्रस्य रध्रतुरोबभूव" ऋ० ६,१८,४, राध–सिद्धौ रन् ह्रस्वः भा०।